# संस्कृतानुसन्धाने नवीनक्षेत्राणि

डा. देवदत्तसरोदे
सहायकाचार्यः
रा.सं.सं. नवदेहली

## सारांशः

*पतञ्जलिः, पाणिनिः, पिङ्गलः, आर्यभटः, चरक; नागार्जुनः, कणादः, स्टीव जाब्स , बिल गेटस्, न्यूटन, ग्यलिलियो, कोपरनिकस इत्यादयः महान्तः स्वीयप्रतिभाबुद्धिकौशलेन विज्ञानस्य, प्रविधेः अनुसन्धानस्य च नवीनानि क्षेत्राणि उद्घाटितवन्तः । विद्यमानसंस्कृतवाङ्मये संस्कृतक्षेत्रे* ***संस्कृतानुसन्धाने नवीनक्षेत्राणि*** *कानि भवितुमर्हन्ति तानि परिशीलयामः । प्रस्तूयमानानि इमानि* ***क्षेत्राणि*** *आपाततः दर्शनेन पुराणानि दृष्टश्रुतपूर्वाणि प्रतिभान्ति । पुनरपि अभिगम(Approach) भेदेन उद्देश्यभेदेन च तस्य स्वरूपं भिद्यते ।*

## प्रस्तावना

मानवः जन्मना आरभ्य स्वीयकामनाः निजावश्यकताश्च पूरयितुम्, आत्मानं परितः विद्यमानं जगद् विलोक्य विस्मितः सन् कुतूहलेन जीज्ञासया प्रवृत्तो भवति । कुतूहलं जीज्ञासां च शमयितुं यतते, सैषा प्रवृत्तिः अनुसन्धानं, सत्यान्वेषणम् इत्युच्यते । जिज्ञासा, गूढदार्शनिकविचाराः, सत्यान्वेषणशीलता, ब्रह्माण्डरहस्यविषये कुतूहलता च मानवस्य स्वाभाविकी प्रवृत्तिरेव । मानवः तापत्रयविघाताय, मोक्षाधिगमाय च अजस्रं यतते, क्वचित् तस्य मनसि कोऽहम्? कुत आयातः? मृत्योः परं किम्? केयं सृष्टिः? इति नानातर्कवितर्कविचाराः जाग्रति[1]। एभिः प्रश्नैः परिपीड्यमानः तत्त्वानुसन्धाने यदा नचिकेताः (अज्ञातः) निर्मलमनाः सन् आध्यात्मिकवर्त्मनि प्रवर्तते, तदा तस्मिन् अन्तर्दृष्टिर्जागर्ति विवेकस्रोतः उद्घाट्यते, दर्शनस्य तत्त्वदृष्टिः चकास्ति, ततो बुद्धो जायते । एतद् ज्ञानमेव विद्यापदेन अभिहितं शास्त्रेषु । परं यदा भौतिकजगतः तत्त्वान्वेषणे तत्त्वमाविष्कर्तुं प्रवृत्तो भवति तदा स विज्ञानमुखेन जगतः अविज्ञातानि नवानि नवानि तत्त्वानि, नियमान्, सिद्धान्तान्, प्राकृतिकतत्त्वानि प्रकटीकरोति । मानवीयसमस्याः परिहर्तुं, तस्य आवश्यकताः पूरयितुं, लोकहिताय अनुसन्धानेन आविष्कृततत्त्वानि, नियमाः महदुपकुर्वन्ति, एतत् ज्ञानम् अविद्या अथवा अपरा विद्येति निगदिता तद्यथा **द्वे विद्ये वेदितव्ये परा च अपरा च**[2] । अतिप्राचिनकालाद् विद्या अविद्या इति धाराद्वयं प्रवृत्ता तद्यथा यजुर्वेदेऽपि कथितमस्ति

**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।**
**अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते**[3] ॥

अमरकोशे तु **मोक्षे धीर्ज्ञानम्, अन्यत्र विज्ञानं शिल्पशास्त्रयोः** इति अस्य तात्पर्यमस्ति मोक्षे यदि मतिर्जायते चेत् एवंजातीयकी बुद्धिर्ज्ञानमित्युच्यते अपि च एतदतिरिच्य शिल्पेषु, शास्त्रेषु लौकिकविद्यासु मतिर्भवति चेत् तद् विज्ञानमिति अभिधीयते । अत्र कोशे विद्या अविद्या इति पराविद्या, अपराविद्या इत्येते ज्ञानं विज्ञानमिति पदाभ्याम् अभिहितम् अनेन एतत् फ़लितम् **ज्ञानम्** - आध्यात्मिकविद्या, **विज्ञानम्** – शिल्पानि, अन्यानि शास्त्राणि लौकिकविद्येति ।

साम्प्रतिके लोके विशिष्य भारतीयसमाजे धारणैषा प्रचलिताऽस्ति, यत् भारते अध्यात्मापेक्षया विज्ञानविषयकचिन्तनम् आविष्कारानुसन्धानानि प्रयोगाश्च नगण्या अल्पीयांसः एव। विज्ञानविषयकचिन्तनस्य, नियमानां, सिद्धान्तानां वैज्ञानिकयन्त्राणाम्, उपकरणानां प्रविधेः विकासः पाश्चात्त्यदेशेष्वेव अधिकतया जातः इति आपाततः सत्यमेतत् प्रतिभाति, परन्तु परमार्थतः नैतत् पूर्णतः सत्यं नास्ति। यदि विगतत्रिशतवर्षाणां विज्ञान-विषयकस्यैतिह्यं विलोकयामः तर्हि पुनर्जागरणकालात् परं (१४ शताब्दीतः १६शताब्दीपर्यन्तं) औद्योगिक -क्रान्तितः (१७६० तः १८४०) पाश्चात्त्यदेशेषु विज्ञानस्य विकासः समजनि, तदा भारतं पराधीनमासीत् अपि च वैदेशिकलुण्ठाकाक्रान्तॄणां लुण्ठनैः विध्वंसनैः राजनीतिकास्थिरताराजकतावैमनस्यकलहादिभिः शिक्षाव्यवस्था विज्ञानस्य परम्परा च क्वचित् खण्डिता तु क्वचित् लुप्ता। परन्तु ततः प्राक् प्राचीनकालस्यैतिह्यं यदि वयं पश्यामः, अपि च भारतस्य पाश्चात्त्यदेशानां वैज्ञानिकविकासस्य कालक्रमिकं तुलनात्मकम् अध्ययनं कुर्मः तर्हि प्राचीनभारते वैज्ञानिकचिन्तनं प्रगतं समृद्धञ्चावर्तत। **विज्ञानस्य अनेकविद्याशाखाः विकसिताः आसन्, यत्र ३२ विद्याः अपि च ६४ कलाः आसन्**[४] परम्परया च विज्ञानस्य शिक्षणं प्रयोगाश्च भवन्ति स्म इत्येतत् तु स्पष्टं प्रतिभाति। एतस्य निदर्शनभूतानि प्राचीनसंस्कृतवाङ्मयं वास्तुभवनानि, मन्दिराणि साक्ष्यरूपेण साम्प्रतमपि विलसन्ति। प्राचीनभारतं ज्ञानविज्ञाननेन **धनधान्येन समृद्धम् ऐश्वर्यशालि चासीत्**[५] भारतस्य अर्थव्यवस्था निखिले विश्वे सर्वेभ्यो बृहती आसीत्, यैषा समृद्धिः ऐश्वर्यम् अनुसन्धानमन्तरेण विज्ञानमन्तरेण प्रविधिं विना सर्वथा दुःशकम्। अनया रीत्या संस्कृतवाङ्मयानुशीलनेन सुतरामेतद् बुध्यते यत् आचार्याणाम्, ऋषीणाम् अजस्रं ज्ञानविज्ञानानुसन्धानपरम्परा विद्यते इति।

बहुभ्यः वर्षेभ्यः संस्कृतक्षेत्रे विश्वविद्यालयेषु अनुसन्धानं जायमानमस्ति परं कृतविषयेषु वर्णनात्मकानुसन्धानस्य बाहुल्यात् तत्रापि चर्वितचर्वणाधिक्यात् संस्कृतानुसन्धानस्य शैक्षिकगुणवत्त्वं लोकोपकारकत्त्वं स्वल्पमेव प्रतिभाति अतः लोकोपकारकम्, शैक्षिकगुणवत्, जीवने प्रयोजनपरम् जीविकापरम् अर्थोत्पादनक्षमम् वस्तूत्पादनक्षमम् अनुसन्धानमपेक्षितम्। संस्कृतवाङ्मयं तु अतिप्राचीनम् अर्वाचीनं चास्ति परं तत्र सर्वथा आधुनिकविषयाः साम्प्रतिकस्वरूपे न सन्ति। अतः संस्कृते विद्यमानविषयाः साम्प्रतिकलोकजीवने कथमुपकर्तुं प्रभवन्ति, तदाधारेण **संस्कृतानुसन्धाने नवीनक्षेत्राणि** परिमार्गणीयानि। विषयेऽस्मिन् यथामति प्रकृतविषयः मया प्रस्तूयते।

अनुसन्धानं प्राधान्येन द्विधा विभक्तुं शक्नुमः **१.मौलिकानुसन्धानम्, २.अनुप्रयोगात्मकानुसन्धानम्**

प्राचीनभारतीयानुसन्धानं द्विधा विभक्तम् १.आत्मानुसन्धानं (पराविद्या) , २.जगतः अनुसन्धानम् (अपरा विद्या) इति।

**अनुसन्धानस्य उद्देश्यम् -** ज्ञानाय, स्वान्तसुखाय, लोकहिताय, आवश्यकतापूर्तये, उपयोगितायै अर्थकृते च अनुसन्धानं भवितुमर्हति।

**अनुसन्धानस्य फलम्** - आत्मने हितम्, लोकहितम्, धनप्राप्तिः, कीर्तिः, आनन्दः, बौद्धिकविकासः इत्यादयः स्युः।

**अनुसन्धानसम्पादनरीतिः** - १) एकाकिना विदुषा सम्पाद्यमानम् अनुसन्धानम्, २) द्वाभ्यां मार्गदर्शकानुसन्धातृभ्यां विधीयमानम् अनुसन्धानम् ३) समूहेन क्रियमाणम् अनुसन्धानम् ४) समाजे क्षेत्रे च विधीयमानम् अनुसन्धानम् ५) आधुनिकवैज्ञानिकैः जनैः सह सम्भूय क्रियमाणम् अनुसन्धानम् ६) कम्पनी, अनुसन्धानशालया, संस्थया सह संयुक्तरूपेण विधीयमानम् अनुसन्धानम्।

आदौ अस्माभिः

**कृतानुसन्धानस्य** - विवरणम् ( संस्कृते संस्कृतेतरभाषासु , देशे विदेशे च , सैद्धान्तिकम्, अनुप्रयोगात्मकम् Applied research & कृतानुवर्तनम् follow up) सम्पादनीयम् । तत:परं

**क्रियमाणानुसन्धानस्य**- विवरणम् ( संस्कृते संस्कृतेतरभाषासु , देशे विदेशे च , सैद्धान्तिकम्, अनुप्रयोगात्मकम् Applied research & कृतानुवर्तनम् follow up) सम्पादनीयम् । एतद्विचार्य भाव्यनुसन्धानं विधेयम् ।

### भाव्यनुसन्धानव्यवस्था-

अनुसन्धाननिमित्तं सुष्ठु व्यवस्था विश्वविद्यालये विधेया ।

- अपेक्षितग्रन्थपाण्डुलिपिप्रतिलिपिव्यवस्था ।
- प्रयोगशालाव्यवस्था।
- अनुसन्धानाय अर्थनियोजनम्
- आधुनिकसंस्थाभि: वैज्ञानिकै: जनै: संयुक्तोद्यमनिमित्तं सम्बन्धकल्पनम् ।
- आधुनिकतन्त्रप्रविधे: व्यवस्था।
- समुचितप्रशिक्षणव्यवस्था ।
- अनुसन्धानदिशादशाशैलीमूल्याङ्कनम् - तदर्थं व्यवस्था, अनुसन्धानसमिति: च ।
- कृतानुसन्धानस्य followup निमित्तं प्रयत्नो विधेय: ।
- संस्कृते अनुप्रयोगात्मकानुसन्धानाय बलम् ।
- शिक्षाक्षेत्रे अनुसन्धानशालाभि: परस्परं सम्बन्ध: कल्पनीय:।
- प्राक्शास्त्रिस्तरादेव अनुसन्धानप्रवृत्तयै बलं देयम् ।

साम्प्रतं एकाकिना सम्पाद्यमानम् अनुसन्धानम्, अथवा द्वाभ्यां मार्गदर्शकानुसन्धातृभ्यां विधीयमानम् अनुसन्धानम् संस्कृतक्षेत्रे जायमानमस्ति । परं संस्कृतक्षेत्रे अनुसन्धानविस्तृतिनिमित्तं लोकोपकाराय च उपयोगि, प्रयोजनपरम्, अर्थकरम् अनुसन्धानं विधेयम् । अनुसन्धाने यादृशविषयो भवति, तादृशी अनुसन्धानरीति स्यात् । केवलं सर्वत्र सदा वर्णनात्मकानुसन्धानं न युज्यते । अत: यादृशविषयस्य कृते यादृशमनुसन्धानमपेक्षितं तथैव विधेयम् ।

## अनुसन्धानक्षेत्राणि

अनुसन्धानस्य नूतननूतनक्षेत्राणि अनुसन्धातु: गुरो: (मार्गदर्शकस्य) वा प्रतिभापाटवे स्थितानि भवन्ति । यथा पतञ्जलि:, पाणिनि:, पिङ्गल:, आर्यभट:, चरक; नागार्जुन:, कणाद:, स्टीव जाब्स , बिल गेटस्, न्यूटन, ग्यलिलियो, कोपरनिकस इत्यादय: महान्त: स्वीयप्रतिभाबुद्धिकौशलेन विज्ञानस्य, प्रविधे: अनुसन्धानस्य च नवीनानि क्षेत्राणि उद्घाटितवन्त: ।

विद्यमानसंस्कृतवाङ्मये संस्कृतक्षेत्रे **संस्कृतानुसन्धाने नवीनक्षेत्राणि** कानि भवितुमर्हन्ति तानि परिशीलयामः। प्रस्तूयमानानि इमानि **क्षेत्राणि** आपाततः दर्शनेन पुराणानि दृष्टश्रुतपूर्वाणि प्रतिभान्ति। पुनरपि अभिगम(Approach) भेदेन उद्देश्यभेदेन च तस्य स्वरूपं भिद्यते।

कस्य परिष्कारेण अन्यत् सर्वं परिणामत्वेन परिष्कृतं भवति? इति उच्यमाने शिक्षाव्यावस्थायाः परिष्कारः विधीयते चेत् शिक्षणाधिगमानुसन्धानव्यवस्था परिष्कृता भवति, ततः अन्याः समस्याः निवर्तन्ते । अतः सर्वकारपक्षतः शिक्षाव्यवस्थायाः परिष्कारः नवशिक्षानीत्या सङ्कलितो विद्यते । स परिष्कारः अस्माभिर्विधेयः । अत्र एतद् अवधेयं प्राचीनसंस्कृतशास्त्राणां शिक्षणाधिगमपरम्परा यथा रक्षिता भवेत् तथा तदनुकूला व्यवस्था अस्माभिः कल्पनीया।

१) **शिक्षा- Education** – प्राचीनभारतीयशिक्षापरम्परा अतीव समृद्धा अवर्तत, अत एव भारतम् आविश्वं विश्वगुरुत्वेन ख्यातमासीत्। विषयेऽस्मिन् अनुसन्धानं जातं जायमानञ्च विद्यते परं वर्णनात्मकानुसन्धानेन केवलं सूचनाः लभ्यन्ते, परं प्राप्तसूचनानां क्रियान्वयनं प्रधानं भवति । अतः संस्कृतशास्त्राणां ज्ञानपरम्परारक्षणाय कथम्भूता शिक्षणव्यवस्था कल्पनीया ? तस्याः क्रियान्वयनम् आफलप्राप्तेः कथं विधेयमिति प्रथमः कल्पः । अतः अत्र आधुनिकप्राचीनसमन्वयात्मकशिक्षणव्यवस्थायै अनुप्रयोगात्मको अनुसन्धानात्मकप्रकल्पो भवितुमर्हति । प्राचीन भारतीयशिक्षाव्यवस्था - विश्वविद्यालयाः, लघुटोलारभ्य विद्यापीठपर्यन्तं नैके विषयाः ग्रन्थेषु वर्णिताः सन्ति तद्यथा ग्रन्थाः **The Educational heritage of Ancient India** by Sahana singh, **Education in ancient India** by A.S Altekar, **Ancient Indian Education** by Radha kumud Mukharjee

२) **गुरुकुलीय शिक्षाव्यवस्था-**

गुरुकुलानि, व्याडीशाला, पाणिनिशाला इति प्राचीनकाले आचार्याणां शालाः आसन्। तादृशाः शालाः साम्प्रतं नावालोक्यन्ते, पुनरपि काश्चन् परम्पराः जीवन्ति, ताः रक्षणीयाः।

I. **दशग्रन्थिपरम्परा** - छन्दोग्योपनिषदि सप्तमप्रपाठके अपराविद्यायाः विस्तरशः वर्णनमुपलभ्यते । सनत्कुमारमुपगम्य नारदः एवमुवाच - **ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां, नक्षत्रविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्येमि सोऽहं भगवो मन्त्रविदेवास्मि नात्मविद्।**

१.ऋग्वेदः, २. यजुर्वेदः, ३.सामवेदः, ४. अथर्ववेदः, ५.इतिहासपुराणम् ६. पित्र्यम्, शुश्रुषाविज्ञानम्, ७. राशि -गणितम् ८. दैवम् – उत्पातविज्ञानम् , ९. निधिम् -अर्थशास्त्रम् ,१०. देवविद्याम् –निरूक्तम्, ११. ब्रह्मविद्या -दर्शनशास्त्रम् शास्त्रीयज्ञानम्, १२. भूतविद्या – भौतिकी, रसायनम्, प्राणिशास्त्रम् , १३. क्षत्रविद्याम् -धनुर्वेदः सैनिकशिक्षा , १४. नक्षत्रविद्या – ज्यौतिषम् , १५. सर्पदेवजनविद्या -सर्पविषचिकित्सा ललितकलाः एताः विद्याः अधिगताः अहं मन्त्रविदस्मि न आत्मविद् आत्मज्ञानं मदीयं नास्ति इत्यर्थः। एतेषां समेषां शास्त्राणामधिगमः न तावत् सुकरः, पुनरपि नारदेन कथं एताः विद्याः अधिगताः ? तर्हि आसीत् काचित् समृद्धा शिक्षणाधिगमपरम्परा । सा परम्परा वेदाध्यनपरम्परायां जीवति - यथा दशग्रन्थिपरम्परा भारतस्य पश्चिमदिग्भागे कोङ्कणप्रान्ते कर्नाटके च ऋग्वेदिनां दशग्रन्थिपरम्परा विद्यते अत्र 1.ऋग्वेदः, 2अष्टाध्यायी, 3, निरुक्तम्, 4 आश्वलायनश्रौतसूत्रम्, आश्वलायनगृह्यसूत्रम् 5.ऐतरेयब्राह्मणम्, 6. ऐतरेयआरण्यकम्, उपग्रन्थाः 7. शिक्षा 8.वेदाङ्गज्योतिषम्, 9.छन्दः, 10.निघण्टुः इति दशग्रन्थानाम् अतिप्राचीनकालात् कण्ठस्थीकरणस्य परम्परा विद्यते । ऋग्वेदस्य घनान्तम् यावद् अध्ययनमत्र भवति ।

सम्पूर्णपाठ्यक्रम: १२-१५ वर्षेषु सम्पत्स्यते । सा अधुना क्षीयमाणा विद्यते । एतेषां धारणाशक्ति: कथम् एतावती महती भवति? अपि च अधिगमनिमित्तं कान् उपायान् कुर्वन्ति? अस्या: परम्पराया: गुणान् आदाय वर्तमानसंस्कृतशास्त्रपरम्परागुणवर्धनं कथं कर्तुं शक्नुम:? इति अनुसन्धेयम् ।

II. **अवधानपरम्परा** – भारते अति प्राचीनकालाद् अवधानपरम्परा अजस्रमनुवर्तते सम्प्रदायभेदेन वैदिकेषु, जैनेषु, च भाषाभेदेन अद्यापि जीवति । एषा धारणा - ज्ञानसंरक्षणनिमित्तम् अत्यन्तमुपकरोति, नानाविद्यानां कौशलानाम् अत्र विनियोग: भवति । एतस्य प्राथमिकस्तराद् आरभ्य यदि पाठ्यक्रमे सन्निवेश: क्रियते चेत् सुष्ठु भवति विषयेऽस्मिन् मनोविज्ञानदृष्ट्या अनुसन्धानं भवितुमर्हति ।

**भारतीयविद्यानां कलानाम् शिक्षणम्**- एतस्मिन् विषये अनुसन्धानम् अपेक्षितमस्ति अस्य उदाहरणम्- हेमचन्द्र संस्कृत गुरुकुलम् गुजरात, संस्कृति आर्य गुरुकुलम् - मेहुलभाई।

**गोकृषि - आधारितस्वावलम्बिशिक्षणम्** –एवंविधं शिक्षणं गोतीर्थविद्यापीठे प्रवर्तते, वस्तुत: भारतीयसंस्कृति: गोकृषिप्रधानासंस्कृति: विद्यते – गोपालभाई सुतारिया – अस्य संस्थापकोऽस्ति अत्रत्यान् गुणान् आदाय अत्र प्रायोगिकानुसन्धानम् कर्तुं शक्नुम: । अथवा केस स्टडी कर्तुं शक्नुम: । भारते एवंविधानि नैकानि गुरुकुलानि सन्ति तत्र अनुसन्धानं करणीयम् ।

**ज्ञानम्** – सर्वमिदं जगत् ज्ञानमयं विद्यते । ज्ञानमन्तरेण कस्यापि बोधो नैव स्यात् । ज्ञानस्य आगम: माध्यमं वा ध्वनिरूपचिह्नानि आकृतिरूपचिह्नानि वा भवन्ति । पुन: इमानि मुख्यत्वेन द्विधा सन्ति अक्षरसमाम्नायरूपेण, सङ्ख्यासमूहरूपेण । अक्षरसङ्ख्याचिह्नैरेव सकलजगत: व्यवहार: निष्पद्यते इममेव विषयं प्रसिद्धपाश्चात्यलेखक: **आल्डस् हग्सले** एवमाह

MAN IS AN amphibian who lives simultaneously in two worlds the given and the home-made, the world of matter, life and consciousness and the world of symbols. In our thinking we make use of a great variety of symbol-systems-linguistic, mathematical, pictorial, musical, ritualistic. Without such symbol-systems we should have no art, no science, no law, no philosophy, not so much as the rudiments of civilization: in other words, we should be animals.[६]

अत एव अक्षराणां महत्त्वं ख्यापयन् भाष्यकार एवमाह

**सोऽयमक्षरसमाम्नायो वाक्समाम्नाय: पुष्पित: फलितश्चन्द्रतारकवत्।**

**प्रतिमण्डितो वेदितव्यो ब्रह्मराशि: सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति**

**मातापितरौ चास्य स्वर्गे लोके महीयेते ।।**[७]

अपि च **भाष्ये** भाष्यकार: पतञ्जलि: वर्णसंदोहरूपस्य सार्थशब्दस्य महिमानमपि अगायत् तद्यथा

**एक: शब्द: सम्यक् ज्ञात: शास्त्रान्वित: सुप्रयुक्त: स्वर्गे लोके च कामधुक् भवति ।**[८]

**ध्वनिचिह्नानि**- अक्षरसमाम्नाय: अल्, वर्णास्त्रिषष्टि:६३, संख्याचिह्नानि(संख्याक्षराणि) १,२,३,४,५,६,७,८,९,०

**आकृतिचिह्नानि** - लिपिरूपेण आकृतिभि: व्यवह्रीयमाणानि चिह्नानि इति ध्वनिचिह्नानि आकृतिचिह्नानि चेति द्विधा चिह्नानि। महावीराचार्यस्य गणितसारसङ्ग्रहे संख्याया: महिमा गणितप्रशस्ति: वा एवं वर्णिता।

**लौकिके वैदिके वापि तथा सामयिकेऽपि य: ।**
**व्यापारस्तत्र सर्वत्र संख्यानमुपयुज्यते ॥**
**कामतन्त्रेऽर्थशास्त्रे च गान्धर्वे नाटकेऽपि वा ।**
**सूपशास्त्रे तथा वैद्ये वास्तुविद्यादिवस्तुषु ॥**
**छन्दोऽलंकारकाव्येषु तर्कव्याकरणादिषु ।**
**कलागुणेषु सर्वेषु प्रस्तुतं गणितं परम् ॥**
**सूर्यादिग्रहचारेषु ग्रहणे ग्रहसंयुतौ ।**
**त्रिप्रश्ने चन्द्रवृत्तौ च सर्वत्रांगीकृतं हि तत् ॥**
**द्वीपसागरशैलानां संख्याव्यासपरिक्षिप: ।**
**भवनव्यन्तरज्योतिर्लोककल्पाधिवासिनाम् ॥**
**नारकाणां च सर्वेषां श्रेणीबन्धेन्द्रकोत्करा: ।**
**प्रकीर्णकप्रमाणाद्या बुध्यन्ते गणितेन ते ॥**
**प्राणिनां तत्र संस्थानमायुरष्टगुणादय: ।**
**यात्राद्यास्संहिताद्याश्च सर्वे ते गणिताश्रया: ॥**
**बहुभिर्प्रलापै: किं त्रैलोक्ये सचराचरे ।**
**यत्किंचिद्वस्तु तत् सर्वं गणितेन विना न हि ॥**
**लौकिके वैदिके वापि तथा सामयिकेऽपि य: ।**
**व्यापारस्तत्र सर्वत्र संख्यानमुपयुज्यते ॥**[९]

एतेष्वेव अक्षरसंख्याचिह्नेषु सर्वं ज्ञानं विज्ञानं च सन्निविष्टं विद्यते मनुनापि निगदितम्

**"सर्वेषां नामानि कर्माणि च पृथक् पृथक् ।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।**[१०]"

सूचनाप्राद्योगिक्यां प्रविधिशास्त्रे सङ्गणकतन्त्रांशे वा एभि: नानाचिह्नैरेव Coding ज्ञानस्य सम्पुटीकरणम् Decoding ज्ञानस्य उन्मीलनम् कुर्वन्ति। अत: ज्ञानस्य Coding Decoding रचनायै सम्यगधिगमाय च परिष्कृतचिह्नानामावश्यता विद्यते। एतस्मिन् प्रशिक्षणम् अनुसन्धानमपेक्षितम्।

३) **मनोविज्ञानम्** - योगदर्शनम्, गीता, उपनिषद्, – इत्यत्र बहून् मनोविज्ञानिकविषयान् आदाय मौलिकं प्रायोगिकमनुसन्धानं कर्तुं शक्नुम:।

**बौद्धजैनसंस्कृतसाहित्ये मनोविज्ञानम्** यथा- धम्मपदम् , प्रज्ञापारमितासूत्राणि अवदानशतकम्-[११] इत्यत्र बहून् मनोविज्ञानिकविषयान् आदाय मौलिकं प्रायोगिकं चानुसन्धानं कर्तुं शक्नुम:।

**Positive Psychology**[१२] - of Martin Seligman , **Emotional Intelligence**, अब्राहम मावस्लो A Theory of Human Motivation *भारतीयमनोविज्ञानम्, प्रात:सायं संन्ध्याविज्ञानम् चादाय अनुसन्धानं कर्तुं शक्यते।

**मूलप्रवृत्तय: -** मक्डुगलमहोदयेन **मूलप्रवृत्तय:** वर्णिता: साहित्ये वर्णितनवरसानां नवभावा:, इतिविषये अनुसन्धानं विधाय शिक्षणे जीवने च सात्त्विकभावसम्पादनाय प्रयत्न: कर्तव्य:।

**बालमनोविज्ञानम्** Child psychology – पञ्चतन्त्रम्, हितोपदेश:, गणिते लीलावती इत्यादयग्रन्था: बालमनोविज्ञानमाश्रित्य रचितवन्त: — अत्र प्रयुक्तोपायान् युक्ती: आदाय अनुसन्धानं विधेयम्।

४) **स्थितप्रज्ञ: - ज्ञानस्य पराकाष्ठा** – योगशास्त्रे ज्ञानस्यैव पराकाष्ठा वैराग्यम् इति वर्णितम् – वैराग्यमेवाभयम् इति भर्तृहरिणा वर्णितम्। **अभयप्राप्ति**निमित्तम्- **अभये शिक्षा स्यात्** – where the mind is without fear [१३] इति - रवीन्द्रनाथटागोरमहोदयेनापि अभिवर्णितम् **अभयप्राप्ति:**[१४] - **अभये शिक्षा** एतस्मिन् मनोवैज्ञानिकदृशा अनुसन्धानम् अपेक्षितम्।

५) **शरीरविज्ञानम्-** प्रकृत्या सामञ्जसेन, आनुकूल्येन **सद्वृत्तम्, स्वस्थवृत्तम्** इति आयुर्वेदनिर्दिष्टानन्दमय जीवनविधानम्, शुचिता Hygiene इत्यादिविषये अनुसन्धानम्।

६) **प्राणविज्ञानम् -** जीवनमस्माकं प्राणाधारितं योगशास्त्रे, घेरण्डसंहिताहठयोगप्रदीपिकादिग्रन्थेषु प्राणायामसाधनाविषये वर्णितं, पञ्चकोशेषु प्राणमयकोशो विद्यते। शरीरस्य कृते जीवनं प्राणेन सम्भवति। अल्पाहारेणापि प्राणायामसाधनेन महतीम् ऊर्जां बलं प्राप्तुं शक्नुम:। प्राणतन्त्रं यदि स्वस्थम् तेजस्वि भवति, चेत् मनुष्य: उत्साही आनन्दी भवति। अत्र प्रायोगिकमनुसन्धानं कर्तुं शक्यते।

७) **वाणीविज्ञानम् – भाषाविज्ञानम्** - पाणिने: अष्टाध्यायी , निरुक्तम्, शिक्षा, प्रातिशाख्यानि इत्येते ग्रन्था:। अत्रापि नवीनदृष्ट्या अनुसन्धानं विधेयम्।

८) **भाषाशिक्षणम् -** अल्पेन कालेन शुद्धा ललिता प्रवाहमयी, बोधगम्या भाषा कथं शिक्षणीया? कथम् अर्जनीया? अत्र प्रायोगिकानुसन्धानम् अपेक्षितम्। (यदि आवासीयशिक्षणं प्रशिक्षणम् केवलं भाषाविषयकं १२ मासावधिके काले भवति चेत् भाषासु छात्रा: निपुणा: भवन्ति एतदर्थं प्रायोगिकानुसन्धानं विधाय आदर्शप्रतिमानं Model निधातुं शक्यते।

I. **यन्त्राणां कृते भाषाशिक्षणम्** - पाणिनिव्याकरणे प्रयुक्तप्रविधय:[१५] – भाषिक लाजिक प्रोग्रामिंग, **प्रत्याहारा:**, **Meta-language** :- any language or symbolic system used to discuss, describe, or analyze another language or symbolic system आर्यभटीयम् इत्यत्र प्रयुक्तम् **Notation** - कृत्रिमसंज्ञाविधानम् , पाणिनि प्रयुक्तप्रविधि:, **Panini and Formal Scientific Notation** -. ... The Backus Normal Form was discovered independently by John Backus in 1959, but **Panini's notation** is equivalent in its power to that of Backus and has many similar properties. user friendly language development, पिङ्गलछन्दशास्त्रे प्रयुक्तप्रविधि: गुरुलघू , प्रस्तारा:, अत्र प्रयुक्तं गणितम् एवं नानाविषयेषु अध्ययनम्, ध्वनिसंकेताधारितं तन्त्रांशनिर्माणम्, संगणकभाषाविकासे सम्भावनाया: अध्ययनम्।

९) **इतिहास: - अभिलेखा:** - एपिग्राफ़ी ओफ़् ईण्डिया, **ताम्रशासनानि**, **नाणकानि** एभि: ऐतिह्यसामग्र्या राष्ट्रजीवने प्राणसञ्चार: भवति, समाजजीवने पूर्वपुरुषाणां गौरवं, शौर्यम् अवदानं ज्ञातुं शक्नुम:, अत्र महाभारतम्, पुराणानि, नीलमतपुराणम्, राजतरङ्गिणी, विक्रमाङ्कदेवचरितम्, सदृशा: नैकेग्रन्था: इतिहाससंशोधने उपकुर्वन्ति। इतिहासस्य

विकृतिशोधनाय इमेऽपि उपकुर्वन्ति ग्रन्था: यथा-**The Chronology of Ancient India : Victim of Concoctions and Distortions** - श्री वेदवीर, **भारतवर्ष का बृहद् इतिहास, वैदिकवाङ्मय का इतिहास, भाषा का इतिहास** - प. भगवद्दत्त, , P.N. Oak साहित्यम्, **प्राचीन भारत**- सत्यकेतु विद्यालङ्कार, **प्राचीन भारत के प्रसाधन, आयुर्वेद का इतिहास** अत्रिदेव विद्यालङ्कार, **बृहत्तर भारत** - आचार्य रामदेव, गुरुकुलकांगडी विश्वविद्यालय।

**नाक्षत्रिकस्थित्याधारितम् ऐतिह्यपरीक्षणम्** – प्राचीन वाङ्मये शिलालेखेषु, ताम्रपत्रेषु नाक्षत्रिकस्थितीनां ग्रहणानां च वर्णनमुपलभ्यते तर्हि अधुना तन्त्रांशेन Software द्वारा पुराकालिकनाक्षत्रिकस्थिति: कस्मिन् काले अभवत् इति ज्ञातुं शक्यते तदाधारेण प्राचीनकालनिर्धारणं कर्तुं शक्नुम:।

१०) **पाश्चात्त्यविदुषां भारतीयविद्यानाम् अध्ययनस्य समीक्षणम्** – ग्रन्थ: पाश्चात्त्यभारतविद् उद्देश्यों का अध्ययन। Maxmuller A life long Masquerade by Brahmdatta Avasthi

११) **डेविड पिन्ग्री महोदयस्य संस्कृतविज्ञानविषयकसाहित्यस्य अनुशीलनं** भवितुमर्हति *A Census of the Exact Sciences in Sanskrit* . (Philadelphia, American Philosophical Society). David E. Pingree (1970–1994) Jyotihsastra-Astral-Mathematical-Literature-History/ Catalogue-Sanskrit-Manuscripts-Columbia-।

१२) **कृतानुसन्धानस्य संस्कृतसाहित्यस्य सर्वेक्षणम्**- कृतानुसन्धानकृतस्य संस्कृतसाहित्यस्य सर्वेक्षणम् विधाय वर्गीकरणम् कृत्वा तदग्रे अनुसन्धानम्।

१३) **पर्यावरणम्** – शुचिता Hygiene, वनसंरक्षणम्, पृथ्वी - भूरक्षणम्, जलसंरक्षणम्, वायुसंरक्षणम्, इति विषया: । अत्र मौलिकानुसन्धानम्, प्रायोगिकानुसन्धानम् भवितुमर्हति । पर्यावरणप्रदूषणमेका महती समस्या विद्यते सा अनुदिवसमेधमाना विद्यते। शास्त्रेषु पर्यावरणसंरक्षणनिमित्तं बहव: उपाया: कल्पिता:, निर्दिष्टा: च सन्ति। तेषु अनुसन्धानं भवितुमर्हति।

१४) **जलप्रबन्धनम्**- जलमेव जीवनमस्ति प्राचीनकाले जलप्रबन्धनं सुष्ठु अवर्तत। देवमातृका नदीमातृका (देवः पर्जन्यम्, एव माता येषां ते देवमातृका वृष्ट्यम्बुजीविनो देशाः। नदी माता येषां ते नदीमातृका नद्यम्बुजीविनो देशाः) 'देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्॥' इत्यमरः।) इति उभयविधभूमौ कृषिकार्यं भवति स्म अत्र जलप्रबन्धे अनुसन्धानम्।

१५) **कृषिशास्त्रम्** - कृषिपाराशरशास्त्रम्।

१६) **स्थापत्यशास्त्रम् -** नगररचना, राजप्रासादरचना, भवनरचना एवं नैके विषया: सन्ति समराङ्गणसूत्रधारे। आधुनिकस्थापत्यविद्भि: सह सम्भूय अत्र बहुषु विषयेषु प्रयोगिकानुसन्धानं भवितुमर्हति।

१७) **राजनीतिशास्त्रम्** – अर्थशास्त्रम्, महाभारतम्, विदुरनीति:, शुक्रनीति:, कामन्दकनीति:, चाणक्यनीति:, आधुनिकसन्दर्भे अनुसन्धानम्।

१८) **Economics- अर्थशास्त्रम्** इति ग्रन्थमादाय वर्तमानसन्दर्भे अर्थशास्त्रविषयान्, प्रबन्धनविषयान् आदाय अनुसन्धानं विधेयम्।

१९) **पुरातत्त्वक्षेत्रम्** – श्रीधर विष्णु वाकणकर, वसन्त शिन्दे डेक्कनकालेज, के. के. मोहमद इत्यादय: जना: पुरातत्त्वे क्षेत्रे संस्कृतस्य महत्त्वं वर्णयन्ति– **रोस्सेटा स्टोन** – द्वारा इजिप्तसभ्यता विज्ञाता तद्वद् सिन्धुघाटी – सभ्यता वेदितव्या।

२०) **न्यायशास्त्रम्- मीमांसाशास्त्रम्-** बौद्धन्याय – गौतम:, उदयनाचर्य:, वाचस्पतिमिश्र:, गङ्गेशोपाध्याय: असङ्ग:, वसुबन्ध:, धर्मकीर्ति: इत्यादया: नैयायिका: तेषां, न्यायरीति: आधुनिकसंगणकक्षेत्रे प्रोग्रामिंग लाजिक, यान्त्रिकशाब्दबोधे - मशिन लर्निंग, इतरत्र वा कथं विनियोक्तुं शक्यते तदर्थमनुसन्धानम्।

२१) **मन्त्रजापध्वनि**विज्ञानम्- स्तोत्रपठनस्य शरीरे प्रभाव: स्वास्थ्यविज्ञानम्।

२२) **यज्ञविज्ञानम्-** अग्निहोत्रविश्वविद्यालय: यज्ञचिकित्सा, यज्ञस्य कृषिसस्ये प्रभाव: इति विषये बहुधा अनुसन्धानम् आधुनिकजनै: सह सम्भूय कर्तुं शक्यम्।

२३) **ज्यामिति-** शुल्बसूत्रस्थविषयाणां वर्तमानगणितशिक्षणे विनियोग: । तथैव इतरगणितग्रन्थेष्वपि विद्यमानान् विषयान् आदाय आधुनिकपरिप्रेक्ष्ये तद्गुणानामुपादेयताविषयेऽध्ययनं भवितुमर्हति।

२४) **सूर्यमन्दिराणाम् अन्यमन्दिराणां च निर्माणम्** स्थापत्यकला अक्षांशे रेखांशे तेषामवस्थिति: तेषां भौगोलिकस्थितिविषये अनुसन्धानम्।

२५) **पाककला** – भारते भिन्नभिन्नप्रान्ते नानाव्यञ्जनानि भोज्यपदार्था: ऋत्वनुकूला: कथं निर्मेया: इति अत्र वर्णितानि सन्ति। अत्र उद्योगस्य महान् अवसरो विद्यते। ग्रन्था: - करणकुतुहलम्, पाकदर्पणम्[१६]।

२६) **षड्रसा:** - एभि:षड्रसै: सञ्चयै:, योगैर्वा जायमाना: नानारसप्रकारयोगा: निर्मातुं शक्या:, विविधव्यञ्जनानि निर्मातुं शक्यन्ते।

**षट् चैवैकरसानि स्युरेकं षड्रसमेव तु।**
**इति त्रिषष्टिद्रव्याणां निर्दिष्टा रससङ्ख्यया॥**
**त्रिषष्टिस्यात्त्वसङ्ख्येया रसानुरसकल्पनात्।**
**रसास्तरतमाभ्यां तां सङ्ख्यामतिपतन्ति हि॥**
**संयोगा: सप्तपञ्चाशत् कल्पना तु त्रिषष्टिधा।**
**रसानां तत्रयोग्यत्वात् कल्पिता रसचिन्तकै:** ॥चरकसूत्रस्थानम् २२-२४

२७) **चित्रकलासु प्रयुक्तद्रव्याणां विज्ञानम्-** अजन्तागुहासु चित्रितानि चित्राणि तत्र प्रयुक्तरङ्गद्रव्याणि विस्मयास्पदानि सन्ति । चित्रितरङ्ग: वर्णो वा अद्यापि चकास्ति, आयलपेण्ट इव प्रतिभाति । अत्रापि अनुसन्धानमपेक्षितमस्ति।

२८) **गन्धार्णव: - घनवालकशैलेयककर्पूरोशीरनागपुष्पाणि।**
**व्याघ्रनखस्पृक्कागुरुमदनकनखतगरधान्यानि॥**
**कर्पूरचोलमलयै: स्वेच्छापरिवर्तितैश्चतुर्भिरत:।**
**एकद्वित्रिचतुर्भिर्भागैर्गन्धार्णवो भवति॥** बृहत्संहिता- गन्धयुक्ति:१३-१४

एभि: षोडशद्रव्यै: परिवर्तितरूपेण भिन्नभिन्नयोगै: १७४७२० संख्याकसुगन्धिद्रव्याणि सिद्धानि भवन्ति। सुगन्धिद्रव्याणाम् उद्योगे व्यापारे च प्राकृतिकद्रव्याणां ( Herbal natural Incredents ) योगेन सिद्धद्रव्यै: व्यापारवृद्धे: महती सम्भावना विद्यते, धनार्जनमपि प्रभूतं भवति। एतादृशा: नैके योगा: अग्निपुराणे, विष्णुधर्मोत्तरपुराणे, मानसोल्लसे, गन्धसारे वर्णिता: सन्ति।

२९) **शृङ्गारप्रसाधनम्**, सुगन्धिद्रव्याणां निर्माणमत्र वर्णितम् । गन्धयुक्तिः केशरागः - बृहत्संहिता ।

३०) **परामर्शविज्ञानम्-** काउंसलिंग - अजाय उपदेशः, शुकनासोपदेशः, भीष्मपर्वणि भीष्मोपदेशः अनाथपीण्डकः - आनन्दः, तिसागौतमी, इमे प्रसङ्गाः एतादृशाः अन्ये प्रसङ्गाः अनुसन्धाने उपयुक्ताः सन्ति ।

३१) **रसविद्या(पारदविद्या) - रसायनशास्त्रम्** – रसरत्नसम्मुचयः, रसार्णव अत्र आधुनिकरसायनशास्त्रदृष्ट्या अध्ययनम् ।

३२) **धातुशास्त्रम्** – भारते पुरा धातुशास्त्रं समृद्धमासीत् जतु zinc, copper, Iron, gold, silver, tin, इत्यादीनां वर्णनं वेदेषु तदितरग्रन्थेषु उपलभ्यते । यदि मेहरोली(दिल्लीस्थम्) स्थितं लोहस्तम्भसदृशं लोहम् अथवा कोणार्कमन्दिरप्राङ्गणे स्थितं लोहं यदि निर्मीयते चेत् लोहजगति क्रान्तिः भविष्यति । यतः एतत् क्षरणहीनं लोहं विद्यते, भवननिर्माणक्षेत्रे उपयुज्यमानं लोहं शीघ्रं क्षरति अतः भवनानि अल्पायुष्कानि भवन्ति । झारखण्ड आरण्यकजनाः एवंविधं लोहं निर्मान्ति इति जनाः वदन्ति । ग्रन्थः - रसरत्नसम्मुच्चयः ।

३३) **व्याकरणपरिभाषा-** अत्रत्यतार्किकोपपत्तयः आधुनिकक्षेत्रे विशिष्य संगणकक्षेत्रे उपयोक्तुं शक्यन्ते।

३४) **धातुवाद**: - सम्मिश्रधातुनिर्माणम् - ग्रन्थः -रसरत्नसम्मुच्चयः ।

३५) **वज्रलेप**: बृहत्संहितायां वराहमिहिरवर्णिते वज्रलेपनिर्माणे (Cement) अनुसन्धानम् ।

३६) **तन्त्रयुक्तिः** - शास्त्रग्रन्थरचनाशिक्षणम्, अधिगमश्च पाठ्यपुस्तकरचनायै, विषयव्याख्याने च तन्त्रयुक्तीनामुपयोगिता । ग्रन्थाः-चरकसंहिता, तन्त्रयुक्तिः, तन्त्रयुक्तियां –( हिन्दी) ।

३७) **अन्तःशास्त्रीयानुसन्धानम्** - Inter disciplinary research – पाणिनिव्याकरणम्- भूगोलः, पाणिनिव्याकरणम्- गोत्रपरम्परा, पाणिनिव्याकरणम्- आधुनिकप्रविधिशास्त्रम् पाणिनिव्याकरणम् – तर्कशास्त्रम्, एवं नानाविषयेषु **अन्तःशास्त्रीयानुसन्धानम्** भवितुमर्हति । बहुश्रुतः आचार्यः पाणिनिः प्रश्यस्ते यतः, **पारावर्यावित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति** –निरुक्तम् १/१६। एवमन्यान्यशास्त्राणाम् **अन्तःशास्त्रीयानुसन्धानम्** भवितुमर्हति

३८) **आयुर्वेदयोगाः** - बहुषु आयुर्वेदिकग्रन्थेषु बहवः योगाः दत्ताः सन्ति । तेषाम् आधुनिक रसायनशास्त्रदृष्ट्या विवेचनपुरस्सरम् अध्ययनम् ।

३९) **पाण्डुलिपिविज्ञानम्** – अत्र शिक्षणम् प्रशिक्षणम् अनुसन्धानम् अपेक्षितम् ।

४०) **पाण्डुलिपिग्रन्थवाचकतन्त्रम्-** यथा आङ्लभाषायाः PDF फार्म मध्ये विद्यमानं matter reading तन्त्रांशः करोति, word form मध्ये convert करोति । तद्वत् पाण्डुलिपिग्रन्थाः शारदा, ग्रन्थ, नन्दनागरी, मोडी, तेलुगु, कन्नड, तमिल, मलयालम, खरोष्ठी, ब्राह्मीलिपिमध्ये भवन्ति । एते ग्रन्थाः भारतीयभाषासु यथा परिवर्तिताः भवन्ति तथा तन्त्रांशः निर्मेयः ।

**४१) संस्कृतविज्ञानपाण्डुलिपिग्रन्थाः** - देशे विदेशे च विद्यमानानां विज्ञानविषयकसंस्कृत -पाण्डुलिपीग्रन्थानां सम्पादनं प्रकाशनम् अनुसन्धानम् अपेक्षितम् । केचन पाण्डुलिपिरूपेण अप्रकाशिताः स्थिताः सन्ति । विषयेऽस्मिन् महद् अनुसन्धानमपेक्षितम् केवलं तमिलनाडुकेरलराज्ययोः तत्र पाण्डुलिपिग्रन्थसङ्ग्रहेषु गणितविज्ञानादिविषयकाः पाण्डुलिपिग्रन्थाः ३५०० सन्ति । तेषु कतिपयप्रकाशिताः अन्ये अप्रकाशिताः सन्ति । यथा- Science texts In Sanskrit in the manuscripts repositories of kerala and Tamilnadu[१७] अस्यां पाण्डुलिपिसूच्यां **३५००** पाण्डुलिपिग्रन्थानां विषयक्रमेणसूची विद्यते । अत्र महती अनुसन्धानस्य सम्भावना विद्यते ।

४२) **संस्कृतविज्ञानविषयकसार्वजनिककोश:** - यथा विकिपीडिया संस्कृतविज्ञानसन्दर्भव्याख्या-विषयवर्गीकृतविश्वकोशस्य निर्माणम् एतत् सामूहिकमनुसन्धानं भविष्यति।

४३) कृष्णाजी विनायक वझे[१८] तत: परं गो.ग. जोशी आभ्यां कृतानुसन्धानस्य समीक्षणम्।

३२ विद्या: ६४ कला: इति निम्नाङ्कितविवरणं तेषामनुसन्धानफलं विद्यते।

**शास्त्रेषु ३२ विद्या: ६४ कला:** अपि वर्णिता: सन्ति ताश्च

**३२ विद्या:** - १.वृक्षविद्या २.पशुविद्या ३.मनुष्यविद्या ४. संसेचनविद्या ५. संहरणविद्या ६.स्तम्भनविद्या ७.दृतिविद्या ८.भस्मीकरणविद्या -९.संकरविद्या १०. पृथक्करणविद्या ११. तरीविद्या १२. नौविद्या १३.नौकाविद्या १४.अश्वविद्या

१५. पथविद्या १६.घंटापथविद्या १७. सेतुविद्या १८.शकुन्तविद्या १९.विमानविद्या २०. वासोविद्या २१.कुट्टिविद्या

२२.मंदिरविद्या २३. प्रासादविद्या २४. आकरविद्या २५. कूटविद्या २६. आकारविद्या २७. युद्धविद्या २८.आपणविद्या २९. राजगृहविद्या ३०.सर्वजनावासविद्या ३१. वनोपवनविद्या ३२. देवालयविद्या


भारतीय शिल्पशास्त्र विस्तारपट
- श्री. कृ. वि. वझे कृत -
भारतीय शिल्पसंहिता
संहिता-१ / खंड-३ / शास्त्रे-१० / विद्या-३२ / कला-६४
भारतीय शिल्पशास्त्र विस्तारपट
धातुनां साधनानांच वास्तुनां शिल्पसंज्ञितम्
धातुखंड
साधनखंड
वास्तुखंड
कृषिजलं खनिश्चेति धातुखंडं त्रिधामिहम् ॥१॥
आकाशे, अग्नियानस्यात् व्योमयानं तदेव हि ॥२॥
कृषिशास्त्र
जलशास्त्र
खनिशास्त्र
नौकाशास्त्र
रथशास्त्र
अग्नियानशास्त्र
वेश्मशास्त्र
प्राकारशास्त्र
नगररचनाशास्त्र
यंत्रशास्त्र
१. वृक्षविद्या
२. पशुविद्या
३. मनुष्यविद्या
४. संसेचनविद्या
५. संहरणविद्या
६. स्तम्भनविद्या
७. दृतिविद्या
८. भस्मीकरणविद्या
९. संकरविद्या
१०. पृथक्करणविद्या
११. तरीविद्या
१२. नौविद्या
१३. नौकाविद्या
१४. अश्वविद्या
१५. पथविद्या
१६. घंटापथविद्या
१७. सेतुविद्या
१८. शकुन्तविद्या
१९. विमानविद्या
२०. वासोविद्या
२१. कुट्टिविद्या
२२. मंदिरविद्या
२३. प्रसादविद्या
२४. दुर्गविद्या
२५. कूटविद्या
२६. आकारविद्या
२७. युद्धविद्या
२८. आपणविद्या
२९. राजगृहविद्या
३०. सर्वजनावासविद्या
३१. वनोपवनविद्या
३२. देवालयविद्या
१. सीराधाकर्षण
२. वृक्षारोपण
३. यावादिक्षुविकार
४. वेणुतृणादिकृती
५. गजाश्वसारथ्य
६. दुग्धदोहविचार
७. यातशिक्षा
८. पल्याणक्रिया
९. पशुचर्मांगनिहार
१०. चर्ममार्दवक्रिया
११. क्षुरकर्म
१२. कंचुकादिसीवन
१३. गृहभाण्डादिमार्जन
१४. वस्त्रसंमार्जन
१५. मनोनुकुलसेवा
१६. नानादेशीय वर्णलेखन
१७. शिशुसंरक्षण
१८. सुयुक्तताडन
१९. शय्यास्तरण
२०. पुष्पादिग्रथन
२१. अन्नपाचन
२२. जलवाय्वग्निसंयोग
२३. रत्नादिसदसद्ज्ञान
२४. क्षारनिष्कासन
२५. क्षारपरिक्षा
२६. स्नेहनिष्कासन
२७. इष्टिकादिभाजन
२८. धात्वौषाहीसंयोग
२९. काचपात्रादिकरण
३०. लोहाभिसार
३१. भाण्डाक्रिया
३२. स्वर्णादितादात्म्यदर्शन
३३. मकरंदादिकृति
३४. धातुसंयोगज्ञान
३५. बाष्पादिभिर्जलतरण
३६. सूत्रादिरज्जुकरण
३७. पटबन्धन
३८. नौकानयन
३९. समभूमिवक्रिया
४०. शिलार्ची
४१. विवरकरण
४२. वृतखण्डबन्धन
४३. जलबन्धन
४४. वायुबन्धन
४५. शकुन्तविद्या
४६. स्वर्णलेपादिसत्क्रिया
४७. चर्मकौयवार्क्ष्यकार्पासदिपटबन्धन
४८. भृत्साधन
४९. तृणाच्छादन
५०. चूर्णोपलेप
५१. वर्णकर्म
५२. दारुकर्म
५३. भृत्कर्म
५४. चित्राद्यालेखन
५५. प्रतिमाकरण
५६. तलक्रिया
५७. शिखरकर्म
५८. मल्लविद्या
५९. शस्त्रसंधान
६०. अस्त्रनिपातन
६१. व्यूहरचना
६२. शल्यादृति
६३. व्रणव्याधिनिवारण
६४. वनोवपनरचना

कामसूत्रे जयमङ्गला टीकायां ६४ कला: वार्णिता: ।

१.गीतम्, २. वाद्यम्, ३.नृत्यम्, ४.आलेख्यम्, ५.विशेषकच्छेद्यम्, ६.तण्डुलकुसुमबलिविकारः, ७.पुष्पास्तरणम्, ८.दशनवसनाङ्गरागः, ९.मणिभूमिकाकर्म, १०.शयनरचनम्, ११.उदकवाद्यम्, १२.उदकाघातः, १३.चित्रयोगः, १४.माल्यग्रथनविकल्पः, १५.शेखरकापीडयोजनम्, १६.नेपथ्यप्रयोगः, १७.कर्णपत्रभङ्गः, १८.**गन्धयुक्तिः**, १९.भूषणयोजनम्, २०.ऐन्द्रजालम्, २१. कौचुमारयोगः, २२.हस्तलाघवम्, २३.विचित्रशाकयूषभक्ष्यविकारक्रियाः, २४.**पानकरसरागासवयोजनम्**, २५. सूचीवानकर्म, २६. सूत्रक्रीडा, २७. वीणाडमरूकवाद्यम्, २८. प्रहेलिका, २९. प्रतिमाला, ३०.दुर्वाचकयोगः, ३१.पुस्तकवाचनम्, ३२.नाटकाख्यायिकादर्शनम्, ३३.काव्यसमस्यापूरणम्, ३४. पट्टिकवानवेत्रविकल्पः, ३५. तक्षकर्म, ३६. तक्षणम्, ३७.वास्तुविद्या, ३८.**रूप्यरत्नपरीक्षा**, ३९.**धातुवादः**, ४०.मणिरागाकरज्ञानम्, ४१.**वृक्षायुर्वेदयोगः**, ४२.मेषकुक्कुटलावकयुद्धविधिः, ४३.शुकसारिकाप्रलापः, ४४.संवाहनम्, ४५.अक्षरमुष्टिकाकथनम्, ४६.म्लेच्छितविकल्पः, ४७.देशभाषाविज्ञानम्, ४८.पुष्पशकटिका, ४९.निमित्तज्ञानम्, ५०.यन्त्रमातृका, ५१.धारणमातृका, ५२.सम्पाठ्यम् ५३. मानसी काव्यक्रिया, ५४. अभिधानकोशः, ५५. छन्दोज्ञानं, ५६. क्रियाकल्पः, ५७. छलितकयोगाः, ५८. आकर्षक्रीडा, ५९.बालक्रीडनक, वस्त्रगोपनानि, ६०. द्यूतविशेषः, ६१.आकर्षक्रीडा, ६२.वैनयिकीविद्या, ६३.वैजयिकीविद्या, ६४.व्यायामिकविद्या।

**शुक्रनीतौ वर्णिता: ६४ कला:**

1. **धातुशोधनम्,** 2. **वास्तुविद्या,** 3. शुकसारिका 4. छंद:अभिधानकोष: 5. छलविद्या: 6. वस्त्रगोपनम् (सिवनम्) 7. जलतरंग:- 8. शैय्यारचना, 9. **चित्रकला,** 10. **अभिनय:** 11. पानकरस: 12. दुर्वाच:, 13. आकरज्ञानम् 14. **वृक्षायुर्वेद:,** 15. पट्टिकावेत्रवाणकल्प:,16. अनुशासनिक: 17. व्यायामविद्या: 18. विजयकौशलविद्या, 19. बालक्रीड़ाकर्म, 20. **पाकविपाक:** 21. पुस्तकवाचनम्, 22. भाषाज्ञान:, 23. प्रहेलिका:, 24. कौचुमार:, 25. प्रतिमाला: 26. हस्तलाघव: 27. आकर्षणम् 28. काव्यसमस्यापूर्ति: 29. मणिभूमिका:, 30. धारण मातृका: 31. सम्पाठय: , 32. अत्तरविकल्प: , 33. यंत्रमातृका:, 34. गन्धयुक्ति:- 35. द्यूतक्रीड़ा:, 36. क्रियाविकल्प:, 37. मानसीकाव्यक्रिया:, 38. आभूषणम्, 39. केशशेखर:, 40. मेषकुक्कुटलावक:, 41. माल्यग्रथन:, 42. विशेष कच्छेद ज्ञान:, 43. मणिराग:, 45. तंडुलकुसुमावलि:, 46. संगीत कला:, 47. नृत्य कला:, 48. केशमार्जन: 49. उदकघात:, 50.नेपथ्य:, 51. **पुष्पास्तरण:,** 52. कर्णपत्र: 53. उत्सादन:, 54. दंशवसनक्रिया:, 55. **रत्नरौप्यपरीक्षणम्,** 56. तुर्ककर्म, 57. तक्षणकर्म, 58. अक्षरमुष्टिकाकथनम्, 59. सूत्रसूचिकर्म 60. म्लेंछिकलाविकल्प: 61. माल्यग्रन्थविकल्प:, 62. चित्रकला 63. इंद्रजाल: 64. कायाकल्प:

अपि च यजुर्वेदस्य त्रिंशत्तमे अध्याये पुरुषमेधप्रसङ्गे कतिपयप्रमुखव्यवसायिनां नामानि दृश्यन्ते, एतेषु नैकेषां व्यवसायानां सम्बन्धः रासायनिकक्रियाभिः सह विद्यते ।

६४ कलासु अद्यापि बह्व्य: कला: कालनुगुणं परिवर्तितरूपेण उद्योगप्राप्तिनिमित्तम् उपादेयपूर्णा: सन्ति अत्रापि आधुनिकदृष्ट्या अनुसन्धानमपेक्षितमस्ति ।

वर्तमानकाले विज्ञानस्य १२ मुख्यविषयेषु ५० विद्याशाखा: प्रमुखा: सन्ति तेषु ४७ विद्याशाखानां संस्कृतशास्त्रेषु प्रमाणानि उपलभ्यन्ते तस्य अधस्तात् विवरणं दीयते अत्रापि अनुसन्धानस्य आवश्यकता विद्यते।

**Sort of Sanskrit References**.

There are about 12 main disciplines of science consisting of 50 branches. For about 47 branches Sanskrit references are available.

A. Mathematics - 1) Arithmetic, 2) Algebra, 3) Geometry 4) Calculus & so on
B. Physics – 5) Heat 6) Light 7) Electricity 8) Magnetism 9) Sound 10) Mechanics 11) Birth of Universe 12) Particle Physics 13) Measurements and so on
C. Chemistry – 14) Organic 15) Inorganic 16) Physical 17) Analytical & so on
D. Botany- 18) Nomenclature 19) Classification 20) Physiology 21) Anatomy & so on
E. Zoology- 22) Nomenclature 23) Classification 24) Characteristics and Animal behavior 25) Anatomy & so on
F. Astronomy- 26) Positional 27) Physical
G. Geography- 28) related to World and Indian , पाणिनि, भुवनकोश:, बौद्धसाहित्ये , पञ्चसिद्धान्तिका
H. Geology 29) Physical 30) Chemical (* red font, Sanskrit references are available )
I. Medicine- 32) Anatomy 33) Physiology 34) Hygiene ( Diagnosis & treatment not for us )
j. Agriculture 35) Seed Management 36) Land & soil management 37) Crop management 38) irrigation 39) Calendar of events 40 ) Storage
k. Engineering – 41) Civil 42) Electrical 43) Mechanical 44) Metallurgy 45) Information Technology (Paninian grammar) Computing science in ancient India
l. Environment:-46) Eco-cycles 47) Seasons 48) Climate 49) Air and Water purification and protection 50) Bio-diversity protection. (* red font, Sanskrit references are available )

## टिप्पण्य: - सन्दर्भाश्च

१. को आद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥६॥
२. मुण्डको. १.४.५
३. ईशोपनिषद् ११
४. द्रष्टव्य:-हिन्दी शिल्पशास्त्र भाग १,लेखक- कृष्णाजी विनायक वझे १९२८
५. **द्रष्टव्य:** – *'History of Indian Economy'*- *Contours of the World Economy 1-2030 AD*. Essays in Macro-Economic History. *Angus Maddison*. Publication Date - December 2007.

६. The first and last Freedom by J. Krishnamurthy

७) पस्पशाह्निकम्- महाभाष्यम्

८) इकोयणचि-महाभाष्यम्

९) गणितसारसंग्रह: - गणितशास्त्रप्रशंसा

१०) मनु.१.२१

११) बौद्धसंस्कृतग्रन्थावली, मिथिला संस्कृतविद्यापीठम् दरभङ्गा ,

१२) scientific study of the "good life", or the positive aspects of the human experience that make life worth living. The discipline of positive psychology focuses on both individual and societal well-being.

१३) Where the mind is without fear and the head is held high
Where knowledge is free
Where the world has not been broken up into fragments
By narrow domestic walls
Where words come out from the depth of truth
Where tireless striving stretches its arms towards perfection
Where the clear stream of reason has not lost its way
Into the dreary desert sand of dead habit
Where the mind is led forward by thee
Into ever-widening thought and action
Into that heaven of freedom, my Father, let my country awake.

१४) अभयं मित्रादभयममित्राद्, अभयं ज्ञातादभयं पुरो यः।
अभयं नक्तमभयं दिवा नः, सर्वा आशा मम मित्रं भवन्तु॥3॥ अथर्ववेदः 19/15/6

१५) Computing science in ancient-India, By Subhash Kak.

१६) सूदशास्त्र - लेखक:, अभिजित सराफ, प्रकाशन, पुणे, २०१६,

१७) Science texts In Sanskrit in the manuscripts repositories of kerala and Tamilnadu Published by Rashtriya Sanskrit Sansthan Delhi

१८) द्रष्टव्य:-हिन्दी शिल्पशास्त्र भाग १, लेखक- कृष्णाजी विनायक वझे १९२८

## सन्दर्भग्रन्था:

१. शुक्ल के.एस. तथा शर्मा के.वी., **आर्यभट्टीयम्**, आर्यभट्ट: प्रथमः, भारतीय राष्ट्रीय विज्ञान अकादमी, नवदेहली, १९७६,

२. बापूदेवशास्त्री (सम्पादकः), **सिद्धान्तशिरोमणि:** भास्कराचार्यः, (वासना-भाष्यम्), चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०५६,

३. झा सुरकान्त (संपादकः), **बृहत्संहिता,** वराहमिहिराचार्यः, (द्वितीयोभागः), भट्टोत्पलविवृत्तिः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, प्र. सं. २००८,

४. झा सीताराम (संपादकः), **लीलावती,** भास्कराचार्यः, विलासिनी-टीका, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११,

५. त्रिपाठी ब्रह्मानन्द (सम्पादकः), **ग्रहलाघवम्**, गणेश दैवज्ञ, चौखम्बा सुरभारती प्रकाशन, वारणसी, १९९५

६. जोशी, **रसरत्नसमुच्चयः,** वाग्भटः, भारतीय राष्ट्रिय विज्ञान अकादमी, नवदेहली, १९९२.

७. शर्मा त्र्यम्बकनाथ, **रसामृतम्,** चौखम्बा संस्कृत सीरीज, वाराणसी, २००१,

८. राय प्रफुल्ल चन्द्र तथा कविरत्न हरीश चन्द्र, (संपादकः), **रसार्णवम्,** द एशियाटिक सोसायटी, कलकत्ता, पुनः प्रकाशन १९८५,

९. डोले एस.एस., **रसशास्त्र,** वैभव अनमोल प्रकाशन, पुणे,

१०. विद्योपाध्याय रामप्रसाद, **रसेन्द्रपुराणम्,** खेमराज श्रीकृष्णदास, मुम्बई, २०००,

११. पाण्डेय शैलजी(टीका), **मयमतम्,** मयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पु.मु. २०११,

१२. मालवीय सुधाकर, तथा मालवीय चित्तरञ्जन (सम्पादकौ), **समराङ्गणसूत्रधारः,** भोजः, चौखम्बा संस्कृत भवन, वाराणसी, प्र.सं., २०६८ वि.,

१३. टी. गणपति शास्त्री म.म., **समराङ्गणसूत्रधार,** ओरियन्टल इन्स्टीट्यूट बडौदा, १९६६,

१४. शर्मा अनन्तराम (व्याख्या), **सुश्रुतसंहिता,** चौखम्बा सुरभारती प्रकाशन, वाराणसी, भाग – १, २०१५.

१५. गुप्त अत्रिदेव (अनुवादः), **चरकसंहिता,** महर्षि अग्निवेश प्रणीत, भार्गव पुस्तकालय गयाघाट बनारस, प्रथम खण्ड, द्वितीय खण्ड, द्वितीय संस्करण, १९४८,

१६. शर्मा भीष्मदत्त (अनुवादः), **ऋग्वेदसंहिता,** चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१२,

१७. कट्टी श्रीनिवासशास्त्री (संपादकः), **रामायणम्,** , परिमल पब्लिकेशन, दिल्ली, प्रथमो भागः (बालकाण्डम्), पुनर्मुद्रणम् – १९९१,

१८. आचार्य सुद्युम्न, **दर्शनशास्त्र की परम्परा में भौतिक विज्ञान,** वेद वाणी वितान, प्राच्य विद्या शोध संस्थान, सतना, (म.प्र.) प्र. सं. २०१५,

१९. सत्यश्रवा (सम्पादकः), **वेद विद्या निदर्शन,** पं. भगवद्दत्त, दयानन्द सरस्वती अनुसन्धान आश्रम, प्रणव प्रकाशन, नवदेहली, द्वि. सं. २००५,

२०. सराफ़ अभिजित, **सूदशास्त्र** - प्रकाशन, पुणे, २०१६,

२१. भार्गवशास्त्री, **महाभाष्यम्,** चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी

२२. **महाभारतम्,** गीता प्रेस गोरखपुर

२३. गणपतिशास्त्री, **अर्थशास्त्रम्,** चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी

२४. Seal Brajendranath, **The Positive Sciences of The Ancient Hindus,** Motilal Banarasidas Publishers, Delhi. Reprint 1991.

२५. Science & Technology in India Through the Ages, Academy of Sanskrit Research, Melkote, Karnataka, 2003.

२६. Roy P. C., **Hindu Chemistry,** Presidency College Kolkata, 1902,

## परिशिष्टानि - पुस्तकानि

### न्यायशास्त्रस्य तर्कशास्त्रस्य प्रमुखग्रन्था:

1. **न्यायसूत्रम्** - गौतममुनि:
2. **न्यायभाष्यम्** - वात्स्यायन:
3. **न्यायवार्तिकम्** - उद्योतकर:
4. **न्यायवार्तिकतात्पर्यटीका** - आचार्य: वाचस्पतिमिश्र:
5. **न्यायसूत्रोद्धार:** - वाचस्पतिमिश्र:
6. **न्यायसूचीनिबन्ध:** - वाचस्पतिमिश्र:
7. **तात्पर्यपरिशुद्धि:** - न्यायाचार्य: उदयन:
8. **न्यायकुसुमांजलि:** - न्यायाचार्य: उदयन:
9. **न्यायपरिशिष्ट:** - न्यायाचार्य: उदयन: ।
10. **लक्षणावली** - न्यायाचार्य: उदयन: ।
11. **आत्मतत्त्वविवेक:** - न्यायाचार्य: उदयन: ।
12. **न्यायमंजरी** - जयन्तभट:
13. **तत्त्वचिन्तामणि:** - गङ्गेशोपाध्याय:
14. **जागादीशी** - जगदीश:
15. **गादाधरी** - गदाधर:
16. **कारिकावली** - विश्वनाथ:
17. **तर्कसंग्रह:** - अन्नंभट:

### गणितपरम्पराया: आचार्याणां कतिपया: प्रसिद्धरचना:

| क्र.सं. | नाम | कृति: | काल: |
|---|---|---|---|
| १ | लगध: | वेदाङ्गज्योतिषम् | १३५० B.C. |
| २ | आर्यभट्टः (प्रथमः) | आर्यभट्टीयम्, | ४९९ ख्री. |

| | | | |
|---|---|---|---|
| ३ | वराहमिहिरः | पञ्चसिद्धान्तिका, बृहत्संहिता, | ५८७ ख्री. |
| ४ | लल्लाचार्यः | शिष्यधीवृद्धिदम् | ५९८ ख्री. |
| ५ | जिनभद्रगणिः | विशेषावश्यकभाष्यम्, | ५७५ ख्री. |
| ६ | ब्रह्मगुप्तः | ब्रह्मस्फुटसिद्धान्तः, खण्डखाद्यकम् | ६५८ ख्री. (५९८) |
| ७ | भास्कराचार्यः (प्रथमः) | महाभाष्यम्, लघुभाष्यम्, आर्यभट्टीयभाष्यम्, | ६२९ ख्री. (५२२) |
| ८ | श्रीधरः | त्रिशतिका, | ७५० ख्री. |
| ९ | वीरसेनः | धवला टीका, | ८१६ ख्री. |
| १० | महावीराचार्यः | गणितसारसंग्रहः, | ८५० ख्री. |
| ११ | गोविन्दस्वामी | महाभास्करीयभाष्यम्, | ८५० ख्री. |
| १२ | पृथुदक्षस्वामी | ब्रह्मसिद्धान्त-वासनाभाष्यम्, | ८६४ ख्री. |
| १३ | वटेश्वराचार्यः | वटेश्वरसिद्धान्तः, | ८८० ख्री. |
| १४ | मुञ्जलः | लघुमानसः, | ९३२ ख्री. |
| १५ | आर्यभट्टः (द्वितीयः) | महासिद्धान्तः, | ९५० ख्री. |
| १६ | अभयदेवसूरिः | टीकाः तथा नव-आगमाः, | १०१५-७५ ख्री. |
| १७ | नेमिचन्द्रः | गोमतसारः | १०११ ख्री. |
| १८ | श्रीपतिः | सिद्धान्तशेखरः,गण तथा यतितिलकः | १०३९ ख्री. (१०४५) |
| १९ | हेमचन्द्रसूरिः | अनुयोगद्वारवृत्तिः | ११०७ ख्री. |
| २० | भास्कराचार्यः (द्वितीयः) | सिद्धान्तशिरोमणिः, लीलावती, बीजगणितम्, | ११५० ख्री. (१११४) |
| २१ | माधवः **(केरलगणितप्रवर्तकः)** | गोलवादः,वेण्वारोहः,स्फुटचन्द्राप्तिः | १३४०-१४२५ ख्री. |
| २२ | महेन्द्रसुरी | यन्त्रराजा | (1351–1388 CE) |
| २३ | नारायणपण्डितः | गणितकौमुदी, | १३५६ ख्री. |
| २४ | परमेश्वरः | लीलावतीव्याख्या, गोलदीपिका | १४३० ख्री. |

| | | | |
|---|---|---|---|
| २५ | पद्मनाभ: | यन्त्रराजाधिकार: | (1423 CE) |
| २६ | नीलकण्ठः | तन्त्रसङ्ग्रहः, | १४४४-१४४५ ख्री. |
| २७ | ज्येष्ठदेवः | युक्तिभाषा, | १४७५ ख्री. |
| २८ | शंकर: वरियारः | क्रियाक्रमकरी, | १५००-१५६० ख्री. |
| २९ | गणेशदैवज्ञः | बुद्धिविलासिनी, ग्रहलाघवम् | १५४५ ख्री. |
| ३० | अच्युत: | स्फुटनिर्णय:,उपरागक्रियाक्रम: | 1550–1621 CE |
| ३१ | मुनीश्वराचार्य: | सिद्धान्तसार्वभौम: | १६२०ख्री. |
| ३२ | पुतुमन सोमयाजी | कर्णपद्धतिः, | १६६०-१७४० ख्री. |
| ३३ | शङ्करवर्मन | सद्रत्नमाला, | १८२३ ख्री. |
| ३४ | श्रीनिवास रामानुजन | Highly Composite Numbers(thesis) | १८८७-१९२० ख्री. |
| ३५ | भारती कृष्णतीर्थः | वैदिकमैथेमैटिक्स | १९५७ ख्री. |

**प्राचीनभारते रसायनपरम्परा आचार्या: तेषां ग्रन्थाश्च**

| क्र.सं. | ग्रन्थकर्त्ता | रचना | काल: |
|---|---|---|---|
| १ | **अपौरुषेय:** | वेदा: | अज्ञात |
| २. | **याज्ञ्यवल्क्य:,** | ब्राह्मणग्रन्था: | ५००० |
| ३. | **चरक:** | चरकसंहिता | १८००B.C. |
| ४. | **सुश्रुत:** | सुश्रुतसंहिता | १५००B.C. |
| ५. | **चाणक्य:** | अर्थशास्त्रम् | ३०० B.C. |
| ६. | **वाग्भट्ट:** | अष्टाङ्गहृदयम्, अष्टाङ्गसङ्ग्रह: | ३०० |
| ७ | **भिक्षुगोविन्द:** | रसहृदयतन्त्रम् | ७०० |
| ८ | **नागार्जुन:** | रसरत्नाकर:, रसेन्द्रमङ्गल: | ८०० |

| | | | |
|---|---|---|---|
| ९ | **तीसटः,** | चिकित्साकलिका | ९०० |
| १० | **वृन्दः** | वृन्दमाधवः (सिद्धयोगः) | ९७५ |
| ११. | **अज्ञातः ?** | रसार्णवः | ११०० |
| १२. | **गोविन्दाचार्यः** | रससारः | १२०० |
| १३. | **काकचण्डीश्वरः** | काकचण्डेश्वरीतन्त्रम् | १२०० |
| १४. | **यशोधरः** | रसप्रकाशसुधाकरः | १२०० |
| १५. | **गोपालकृष्णः** | रसेन्द्रसारसङ्ग्रहः | १२०० |
| १६. | **ढुण्ढुकनाथः** | रसेन्द्रचिन्तामणिः | १३०० |
| १७. | **नित्यनाथसिद्धः** | रसरत्नाकरः | १४०० |
| १८. | **वाग्भट्टः** | रसरत्नसमुच्चयः | १४०० |
| १९. | **चूडामणिः** | रसकामधेनुः | १५०० |
| २० | **शार्ङ्गधाराचार्यः** | दिव्यरसेन्द्रसारः | १५०० |